प्रथमः पाठः

# मङ्गलाचरणम्

वेदोऽखिलो धर्ममूलम्। संस्कृतभाषायाः आदिग्रन्थाः वेदाः एव। वेदमन्त्रेषु यज्ञविधीनां ज्ञानं दर्शनं वैदिकर्षीणां चिन्तनं च दृश्यते। सस्वर–मन्त्राणां पारायणेन वाक्यशुद्धिः, मनःशुद्धिः, वातावरणशुद्धिः च भवन्ति। अतः एव मङ्गलाचरणे वैदिकमन्त्राणां महत्त्वं निर्विवादम्।

*शं नः सूर्य उरुचक्षा उदेतु*
*शं नश्चतस्रः प्रदिशो भवन्तु।*
*शं नः पर्वता ध्रुवयो भवन्तु*
*शं नः सिन्धवः शमु सन्त्वापः ॥1॥*

**अन्वयः** - उरुचक्षा सूर्यः नः शं उदेतु चतस्रः प्रदिशो नः शं भवन्तु ध्रुवयो पर्वता नः शं भवन्तु। सिन्धवः शमु आपः नः शं सन्तु।

**शब्दार्थः** -

| | | |
|---|---|---|
| उरुचक्षा | - | विराटदृष्टिसम्पन्नः (विशालदृष्टि से युक्त) |
| शम् | - | कल्याणम् |
| नः | - | अस्माकम् |
| ध्रुवयो | - | अचलाः |
| सिन्धवः | - | नद्यः |
| आपः | - | जलानि |

*वात आ वातु भेषजं*
*शंभु मयो भु नो हृदे।*
*प्रण आयूँषि तारिषत् ॥ 2 ॥*

**अन्वयः** - नो भेषजं मयो हृदे शंभु भु वातः आ वातु। ण (नः) आयूँषि प्रतारिषत्।

**शब्दार्थः** -

| | | |
|---|---|---|
| भेषजम् | - | औषधम् |
| मयो | - | युक्तो |
| शम् | - | कल्याणकारिणम् |
| वातु | - | प्रवहतु (बहें) |
| आयूँषि | - | वयांसि (उम्र) |

*सुषारथिरश्वानिव यन्मनुष्या-*
*न्नेनीयतेऽभीशुभिर्वाजिन इव ।*
*हृत्प्रतिष्ठं यदजिरं जविष्ठं*
*तन्मे मनः शिवसङ्कल्पमस्तु ॥3॥*

**अन्वयः** - यत् (मनः) सुषारथिः अश्वान् इव, अभीषुभिः वाजिन इव मनुष्यान् नेनीयते, यत् हृत्प्रतिष्ठम्, अजिरम् जविष्ठम्, तत् मे मनः शिवसङ्कल्पमस्तु ।

**शब्दार्थः** -

| | | |
|---|---|---|
| वाजिनः | - | अश्वान् (घोड़ों को) |
| अजिरम् | - | जरारहितम् (वृद्धावस्था से रहित) |
| जविष्ठम् | - | वेगवत् (शीघ्र) |
| शिवसङ्कल्पम् | - | शुभसङ्कल्पम् (कल्याण से युक्त) |
| अभीषुभिः | - | अश्ववल्गाभिः, रश्मिभिः |

*अग्ने व्रतपते व्रतं चरिष्यामि*
*तच्छकेयं तन्मे राध्यताम् ।*
*इदमहमनृतात् सत्यमुपैमि ॥4॥*

**अन्वयः** - व्रतपते ! अग्ने ! व्रतं चरिष्यामि । इयम् शकेयम् तत् मे राध्यताम् । अहम् इदम् अनृतात् सत्यम् उपैमि ।

**शब्दार्थः** -

| | | |
|---|---|---|
| व्रतपते | - | व्रतस्वामिन् |
| शकेयम् | - | सामर्थ्ययुक्तम् |
| अनृतात् | - | असत्यात् |
| उपैमि | - | समीपम् आगच्छामि |

*स्वस्ति मात्र उत पित्रे नो अस्तु*
*स्वस्ति गोभ्यो जगते पुरुषेभ्यः ।*
*विश्वं सभूतं सुविदत्रं नो अस्तु*
*ज्योगेव दृशेम सूर्यम् ॥5॥*

**अन्वयः** - (हे प्रभो) नो मात्र उत पित्रे स्वस्ति अस्तु, जगते गोभ्यो पुरुषेभ्यः स्वस्ति । नः सभूतं विश्वं सुविदत्रम् अस्तु । ज्योगेव सूर्यं दृशेम ।

**शब्दार्थः** -

| | | |
|---|---|---|
| मात्रे | - | जनन्यै (माता के लिये) |
| पित्रे | - | जनकाय |
| सभूतम् | - | पञ्चभूतसहितम् |
| सुविदत्रम् | - | शुभज्ञानपूर्णम् |
| दृशेम | - | पश्येम |
| ज्योगेव | - | चिरन्तनकालपर्यन्तम् |

*मधुमन्मे निष्क्रमणं मधुमन्मे परायणम् ।*

*वाचा वदामि मधुमद् भूयासं मधुसंदृशः ॥6॥*

**अन्वयः** - (हे प्रभो) मे निष्क्रमणं मधुमत्, मे परायणं मधुमत्, मधुमद् वाचा वदामि, मधु संदृशः भूयासम् ।

**शब्दार्थः** -

| | | |
|---|---|---|
| निष्क्रमणम् | - | निर्गमनम् |
| संदृशः | - | सदृशः |
| मधुमद् | - | माधुर्यपूर्णम् |

## अभ्यासः

1. **एकपदेन उत्तरत -**

(क) पर्वताः कीदृशाः सन्तु ?

(ख) सिन्धवः कीदृशाः सन्तु ?

(ग) हृदि सुखदायकः कः ?

(घ) केन युक्तं मे निष्क्रमणम् ?

2. **एकवाक्येन उत्तरत -**

(क) मे मनः कथमस्तु ?

(ख) अहम् अनृतात् किम् उपैमि ?

(ग) उरुचक्षा कः अस्ति ?

(घ) आपः कीदृशाः सन्तु ?

3. **त्रिचतुर्भिर्वाक्यैः उत्तरत -**

(क) के नः शं भवन्तु ?

(ख) केभ्यः स्वस्ति भवतु ?

(ग) के मधुमन्मे भवताम् ?

4. **प्रदत्तशब्दैः रिक्तस्थानानि पूरयत -**

(सूर्यः, वातु, व्रतपते, वदामि)

(क) वाचा ............................. मधुमद् ।

(ख) शं नः ............................. उरुचक्षा उदेतु ।

(ग) वात आ ........................ भेषजम् ।

(घ) अग्ने .......................... व्रतं चरिष्यामि ।

5. **युग्ममेलनं कुरुत –**

| 'अ' | 'आ' |
|---|---|
| (क) शं न: पर्वता: | सत्यमुपैमि |
| (ख) इदमहमनृतात् | परायणम् |
| (ग) मधुमन्मे | ध्रुवयो भवन्तु |

6. **शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत –**

(क) भूयासं मधुसंदृश: ☐

(ख) मे मन: असङ्कल्पमस्तु ☐

(ग) सत्यव्रतं चरिष्यामि ☐

(घ) शं सन्तु आप: ☐

7. **अधोलिखितक्रियापदानां धातुं लकारं पुरुषं वचनं च लिखत –**

| क्रियापदम् | धातु: | लकार: | पुरुष: | वचनम् |
|---|---|---|---|---|
| चरिष्यामि | | | | |
| उपैमि | | | | |
| अस्तु | | | | |
| वदामि | | | | |
| सन्तु | | | | |
| भवन्तु | | | | |

8. **एकवचनत: बहुवचने परिवर्तयत –**

| एकवचनम् | बहुवचनम् |
|---|---|
| सिन्धु: | |
| पर्वत: | |
| भवतु | |
| अस्तु | |
| चरिष्यामि | |
| सत्यम् | |
| पुरुषाय | |

## योग्यताविस्तार: –

- पाठे समागतान् मन्त्रान् कण्ठस्थं कुरुत।
- मन्त्राणां सस्वरवाचनं समूहे कुरुत।
- वेदानाम् अन्यान् मन्त्रान् चित्वा लिखत पठत च।